# Mankigita

# મઙ્કિગીતા

## Document Information

Text title : mankigItA

File name : mankigiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi

Latest update : June 2, 1998

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2022

*sanskritdocuments.org*

# મઙ્કિગીતા

અધ્યાયઃ ૧૭૧

યુધિષ્ઠિર

ઈહમાનઃ સમારમ્ભાન્યદિ નાસાદયેદ્ધનમ્ ।
ધનતૃષ્ણાભિભૂતશ્ચ કિં કુર્વન્સુખમાપ્નુયાત્ ॥ ૧॥

ભીષ્મ

સર્વસામ્યમનાયાસઃ સત્યવાક્યં ચ ભારત ।
નિર્વેદશ્ચાવિવિત્સા ચ યસ્ય સ્યાત્સ સુખી નરઃ ॥ ૨॥

એતાન્યેવ પદાન્યાહુઃ પઞ્ચ વૃદ્ધાઃ પ્રશાન્તયે ।
એષ સ્વર્ગશ્ચ ધર્મશ્ચ સુખં ચાનુત્તમં સતામ્ ॥ ૩॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
નિર્વેદાન્મઙ્કિના ગીતં તન્નિબોધ યુધિષ્ઠિર ॥ ૪॥

ઈહમાનો ધનં મઙ્કિર્ભગ્નેહશ્ચ પુનઃ પુનઃ ।
કેન ચિદ્ધનશેષેણ ક્રીતવાન્દમ્ય ગોયુગમ્ ॥ ૫॥

સુસમ્બદ્ધૌ તુ તૌ દમ્યૌ દમનાયાભિનિઃસૃતૌ ।
આસીનમુષ્ટ્રં મધ્યેન સહસૈવાભ્યધાવતામ્ ॥ ૬॥

તયોઃ સમ્પ્રાપ્તયોરુષ્ટ્રઃ સ્કન્ધદેશમમર્ષણઃ ।
ઉત્થાયોત્ક્ષિપ્ય તૌ દમ્યૌ પ્રસસાર મહાજવઃ ॥ ૭॥

હ્રિયમાણૌ તુ તૌ દમ્યૌ તેનોષ્ટ્રેણ પ્રમાથિના ।
મ્રિયમાણૌ ચ સમ્પ્રેક્ષ્ય મઙ્કિસ્તત્રાબ્રવીદિદમ્ ॥ ૮॥

ન ચૈવાવિહિતં શક્યં દક્ષેણાપીહિતું ધનમ્ ।
યુક્તેન શ્રદ્ધયા સમ્યગીહાં સમનુતિષ્ઠતા ॥ ૯॥

કૃતસ્ય પૂર્વં ચાનર્થૈર્યુક્તસ્યાપ્યનુતિષ્ઠતઃ ।

ઇમં પશ્યત સઙ્ગત્યા મમ દૈવમુપપ્લવમ્ ॥ ૧૦॥

ઉદ્યમ્યોદ્યમ્ય મે દમ્યૌ વિષમેનેવ ગચ્છતિ ।
ઉત્ક્ષિપ્ય કાકતાલીયમુન્માથેનેવ જમ્બુકઃ ॥ ૧૧॥

મની વોષ્ટ્રસ્ય લમ્બેતે પ્રિયૌ વત્સતરૌ મમ ।
શુદ્ધં હિ દૈવમેવેદમતો નૈવાસ્તિ પૌરુષમ્ ॥ ૧૨॥

યદિ વાપ્યુપપદ્યેત પૌરુષં નામ કર્હિ ચિત્ ।
અન્વિષ્યમાણં તદપિ દૈવમેવાવતિષ્ઠતે ॥ ૧૩॥

તસ્માન્નિર્વેદ એવેહ ગન્તવ્યઃ સુખમીપ્સતા ।
સુખં સ્વપિતિ નિર્વિણ્ણો નિરાશશ્ચાર્થસાધને ॥ ૧૪॥

અહો સમ્યક્શુકેનોક્તં સર્વતઃ પરિમુચ્યતા ।
પ્રતિષ્ઠતા મહારણ્યં જનકસ્ય નિવેશનાત્ ॥ ૧૫॥

યઃ કામાન્પ્રાપ્નુયાત્સર્વાન્યશ્ચૈનાન્કેવલાંસ્ત્યજેત્ ।
પ્રાપનાત્સર્વકામાનાં પરિત્યાગો વિશિષ્યતે ॥ ૧૬॥

નાન્તં સર્વવિવિત્સાનાં ગતપૂર્વોઽસ્તિ કશ્ ચન ।
શરીરે જીવિતે ચૈવ તૃષ્ણા મન્દસ્ય વર્ધતે ॥ ૧૭॥

નિવર્તસ્વ વિવિત્સાભ્યઃ શામ્ય નિર્વિદ્ય મામક ।
અસકૃચ્ચાસિ નિકૃતો ન ચ નિર્વિદ્યસે તનો ॥ ૧૮॥

યદિ નાહં વિનાશ્યસ્તે યદ્યેવં રમસે મયા ।
મા માં યોજય લોભેન વૃથા ત્વં વિત્તકામુક ॥ ૧૯॥

સઞ્ચિતં સઞ્ચિતં દ્રવ્યં નષ્ટં તવ પુનઃ પુનઃ ।
કદા વિમોક્ષ્યસે મૂઢ ધનેહાં ધનકામુક ॥ ૨૦॥

અહો નુ મમ બાલિશ્યં યોઽહં ક્રીદનકસ્તવ ।
કિં નૈવ જાતુ પુરુષઃ પરેષાં પ્રેષ્યતામિયાત્ ॥ ૨૧॥

ન પૂર્વે નાપરે જાતુ કામાનામન્તમાપ્નુવન્ ।
ત્યક્ત્વા સર્વસમારમ્ભાન્પ્રતિબુદ્ધોઽસ્મિ જાગૃમિ ॥ ૨૨॥

નૂનં તે હૃદયં કામવજ્ર સારમયં દૃધમ્ ।
યદનર્થશતાવિષ્ટં શતધા ન વિદીર્યતે ॥ ૨૩॥

ત્યજામિ કામત્વાં ચૈવ યચ્ચ કિં ચિત્પ્રિયં તવ ।
તવાહં સુખમન્વિચ્છન્નાત્મન્યુપલભે સુખમ્ ॥ ૨૪॥

કામજાનામિ તે મૂલં સઙ્કલ્પાત્કિલ જાયસે ।
ન ત્વાં સઙ્કલ્પયિષ્યામિ સમૂલો ન ભવિષ્યતિ ॥ ૨૫॥

ઈહા ધનસ્ય ન સુખા લબ્ધ્વા ચિન્તા ચ ભૂયસી ।
લબ્ધાનાશો યથા મૃત્યુર્લબ્ધં ભવતિ વા ન વા ॥ ૨૬॥

પરેત્ય યો ન લભતે તતો દુઃખતરં નુ કિમ્ ।
ન ચ તુષ્યતિ લબ્ધેન ભૂય એવ ચ માર્ગતિ ॥ ૨૭॥

અનુતર્ષુલ એવાર્થઃ સ્વાદુ ગાઙ્ગમિવોદકમ્ ।
મદ્વિલાપનમેતત્તુ પ્રતિબુદ્ધોઽસ્મિ સન્ત્યજ ॥ ૨૮॥

ય ઇમં મામકં દેહં ભૂતગ્રામઃ સમાશ્રિતઃ ।
સ યાત્વિતો યથાકામં વસતાં વા યથાસુખમ્ ॥ ૨૯॥

ન યુષ્માસ્વિહ મે પ્રીતિઃ કામલોભાનુસારિષુ ।
તસ્માદુત્સૃજ્ય સર્વાન્વઃ સત્યમેવાશ્રયામ્યહમ્ ॥ ૩૦॥

સર્વભૂતાન્યહં દેહે પશ્યન્મનસિ ચાત્મનઃ ।
યોગે બુદ્ધિં શ્રુતે સત્ત્વં મનો બ્રહ્મણિ ધારયન્ ॥ ૩૧॥

વિહરિષ્યામ્યનાસક્તઃ સુખી લોકાન્નિરામયઃ ।
યથા મા ત્વં પુનર્નૈવં દુઃખેષુ પ્રનિધાસ્યસિ ॥ ૩૨॥

ત્વયા હિ મે પ્રનુન્નસ્ય ગતિરન્યા ન વિદ્યતે ।
તૃષ્ણા શોકશ્રમાણાં હિ ત્વં કામપ્રભવઃ સદા ॥ ૩૩॥

ધનનાશોઽધિકં દુઃખં મન્યે સર્વમહત્તરમ્ ।
જ્ઞાતયો હ્યવમન્યન્તે મિત્રાણિ ચ ધનચ્યુતમ્ ॥ ૩૪॥

અવજ્ઞાન સહસ્રૈસ્તુ દોષાઃ કસ્તતરાધને ।
ધને સુખકલા યા ચ સાપિ દુઃખૈર્વિધીયતે ॥ ૩૫॥

ધનમસ્યેતિ પુરુષં પુરા નિઘ્નન્તિ દસ્યવઃ ।
ક્લિશ્યન્તિ વિવિધૈર્દન્દૈર્નિત્યમુદ્વેજયન્તિ ચ ॥ ૩૬॥

મન્દલોલુપતા દુઃખમિતિ બુદ્ધિં ચિરાન્મયા ।
યદ્યદાલમ્બસે કામતત્તદેવાનુરુધ્યસે ॥ ૩૭॥

અતત્ત્વજ્ઞોઽસિ બાલશ્ચ દુસ્તોષોઽપૂરણોઽનલઃ ।
નૈવ ત્વં વેત્થ સુલભં નૈવ ત્વં વેત્થ દુર્લભમ્ ॥ ૩૮॥

પાતાલમિવ દુષ્પૂરો માં દુઃખૈર્યોક્તુમિચ્છસિ ।
નાહમદ્ય સમાવેષ્ટું શક્યઃ કામપુનસ્ત્વયા ॥ ૩૯॥

નિર્વેદમહમાસાદ્ય દ્રવ્યનાશાદ્યદૃચ્છયા ।
નિર્વૃતિં પરમાં પ્રાપ્ય નાદ્ય કામાન્વિચિન્તયે ॥ ૪૦॥

અતિક્લેશાન્સહામીહ નાહં બુધ્યામ્યબુદ્ધિમાન્ ।
નિકૃતો ધનનાશેન શયે સર્વાઙ્ગવિજ્વરઃ ॥ ૪૧॥

પરિત્યજામિ કામત્વાં હિત્વા સર્વમનોગતીઃ ।
ન ત્વં મયા પુનઃ કામનસ્યોતેનેવ રંસ્યસે ॥ ૪૨॥

ક્ષમિષ્યેઽક્ષમમાણાનાં ન હિંસિષ્યે ચ હિંસિતઃ ।
દ્વેષ્ય મુક્તઃ પ્રિયં વક્ષ્યામ્યનાદૃત્ય તદપ્રિયમ્ ॥ ૪૩॥

તૃપ્તઃ સ્વસ્થેન્દ્રિયો નિત્યં યથા લબ્ધેન વર્તયન્ ।
ન સકામં કરિષ્યામિ ત્વામહં શત્રુમાત્મનઃ ॥ ૪૪॥

નિર્વેદં નિર્વૃતિં તૃપ્તિં શાન્તિં સત્યં દમં ક્ષમામ્ ।
સર્વભૂતદયાં ચૈવ વિદ્ધિ માં શરણાગતમ્ ॥ ૪૫॥

તસ્માત્કામશ્ચ લોભશ્ચ તૃષ્ણા કાર્પણ્યમેવ ચ ।
ત્યજન્તુ માં પ્રતિષ્ઠન્તં સત્ત્વસ્થો હ્યસ્મિ સામ્પ્રતમ્ ॥ ૪૬॥

પ્રહાય કામં લોભં ચ ક્રોધં પારુષ્યમેવ ચ ।
નાદ્ય લોભવશં પ્રાપ્તો દુઃખં પ્રાપ્સ્યામ્યનાત્મવાન્ ॥ ૪૭॥

યદ્યત્ત્યજતિ કામાનાં તત્સુખસ્યાભિપૂર્યતે ।
કામસ્ય વશગો નિત્યં દુઃખમેવ પ્રપદ્યતે ॥ ૪૮॥

કામાન્વ્યુદસ્ય ધુનુતે યત્કિં ચિત્પુરુષો રજઃ ।
કામક્રોધોદ્ભવં દુઃખમહ્રીરરતિરેવ ચ ॥ ૪૯॥

એષ બ્રહ્મ પ્રવિષ્ટોઽહં ગ્રીસ્મે શીતમિવ હ્રદમ્ ।
શામ્યામિ પરિનિર્વામિ સુખમાસે ચ કેવલમ્ ॥ ૫૦॥

યચ્ચ કામસુખં લોકે યચ્ચ દિવ્યં મહત્સુખમ્ ।

તૃષ્ણા ક્ષયસુખસ્યૈતે નાર્હતઃ ષોડશીં કલામ્ ॥ ૫૧॥

આત્મના સપ્તમં કામં હત્વા શત્રુમિવોત્તમમ્ ।
પ્રાપ્યાવધ્યં બ્રહ્મ પુરં રાજેવ સ્યામહં સુખી ॥ ૫૨॥

એતાં બુદ્ધિં સમાસ્થાય મઙ્કિર્નિર્વેદમાગતઃ ।
સર્વાન્કામાન્પરિત્યજ્ય પ્રાપ્ય બ્રહ્મ મહત્સુખમ્ ॥ ૫૩॥

દમ્ય નાશ કૃતે મઙ્કિરમરત્વં કિલાગમત્ ।
અછિનત્કામમૂલં સ તેન પ્રાપ મહત્સુખમ્ ॥ ૫૪॥

॥ ઇતિ મઙ્કિગીતા સમાપ્તા ॥

Adhyaya number 177 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition it is 171.

Sunder Hattangadi

*Mankigita*
pdf was typeset on October 30, 2022

Please send corrections to *sanskrit@cheerful.com*